श्रीगणेशाय नमः ॥ ॐ नमो भगवते वासुदेवाय ॥ यस्य स्मर
णमात्रेण जन्मसंसारबंधनात् ॥ विमुच्यते नमस्तस्मै वि
ष्णवे प्रभविष्णवे ॥१॥ नमः समस्तभूतानामादिभूताय भूभृते
अनेकरूपरूपाय विष्णवे प्रभविष्णवे ॥ श्रीवैशंपायन उवाच
श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ॥ युधिष्ठि
र ॥ शांतनवं पुनरेवाभ्यभाषत ॥२॥ युधिष्ठिर उवाच ॥ ॥२॥
किमेकं दैवतं लोके किं वाप्येकं परायणं ॥ स्तुवंतः कं कम
र्चंतः प्राप्नुयुर्मानवाः शुभम् ॥३॥ को धर्मः सर्वधर्मा
णां भवतः परमो मतः ॥ किं जपन्मुच्यते जंतुर्जन्मसंसा
[illegible] ॥४॥ भीष्म उवाच ॥ जगत्प्रभुं देवदेवमनंतं
पुरुषोत्तमं ॥

पुरुषोत्तमम् ॥ स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥५॥
तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ॥ ध्यायंस्तुवंन्न
मस्यंश्च यजमानस्तमेव च ॥ अनादिनिधनं विष्णुं सर्वलो
कमहेश्वरम् ॥ लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भ
वेत् ॥७॥ ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ॥
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥८॥ एष मे सर्व
धर्माणां धर्मोऽधिकतमो मतः ॥ यद्भक्त्या पुण्डरीकाक्षं
स्तवैरर्चेन्नरः सदा ॥९॥ परमं यो महत्तेजः परमं यो मह
त्तपः ॥ परमं यो महद्ब्रह्म परमं यः परायणम् ॥१०॥ पवित्रा
णां पवित्रं यो मंगलानां च मंगलम् ॥ दैवतं देवतानां च

[illegible] …निरुद्धिः शक्तिः अ: अयोनिः स्वयंजात इति बीजम्
उद्भवः क्षोभणो देव इति मन्त्रः शंखभृन्नन्दकी चक्रीति
कीलकम् त्रिसामा सामगः सामेति कवचम् शार्ङ्गध
न्वा गदाधर इत्यस्त्रम् ॐ विश्वं विष्णुर्वषट्कार इति ध्यानम्
ॐ विश्वं विष्णुर्वषट्कार इत्यङ्गुष्ठाभ्यां नमः अमृतांशूद्
भवो भानुरिति तर्जनीभ्यां नमः ब्रह्मण्यो ब्रह्मकृद्ब्रह्मे
ति मध्यमाभ्यां नमः सुवर्णबिन्दुरक्षोभ्य इत्यनामिका
भ्यां नमः श्रीगोप्योज्योतिरादित्य इति कनिष्ठिकाभ्यां
नमः इति करन्यासः ॐ विश्वं विष्णुर्वषट्कार इति हृदया
य नमः अमृतांशूद्भवो भानुरिति शिरसे स्वाहा।

भूगर्भो माधवो मधुसूदनः २६ ईश्वरो विक्रमी धन्वी मे
धावी विक्रमः क्रमः अनुत्तमो दुराधर्षः कृतज्ञः कृति
रात्मवान् २७ सुरेशः शरणं शर्म विश्वरेताः प्रजाभ
वः अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः २८ अजः
सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः वृषाकपिरमेया
त्मा सर्वयोगविनिःसृतः २९ वसुर्वसुमनाः सत्यः समा
त्मा संमितः समः अमोघः पुण्डरीकाक्षो वृषकर्मा वृषा
कृतिः ३० रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः
अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः ३१ सर्वगः
सर्ववित् भानुर्विष्वक्सेनो जनार्दनः वेदो वेदविद
व्यंगो वेदांगो वेदवित् कविः ३२ लोकाध्यक्षः सुराध्यक्षो

पूतात्मा परमात्मा च मुक्तानां परमागतिः अव्ययः पुरुषः
साक्षी क्षेत्रज्ञोऽक्षर एव च २० योगो योगविदां नेता प्रधान
पुरुषेश्वरः नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः
२१ सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः संभवो भा
वनो भर्ता प्रभवः प्रभुरीश्वरः २२ स्वयंभूः शंभुरादित्यः
पुष्कराक्षो महास्वनः अनादिनिधनो धाता विधाता धा
तुरुत्तमः २३ विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थवि
रो ध्रुवः २४ अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रत
र्दनः प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् २५ ईशा
नः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः हिरण्यगर्भो
भूगर्भो माधवो मधुसूदनः २६

हेलनोमहंसः सुपर्णो भुजगोत्तमः हिरण्यनाभः सुतपाः
पद्मनाभः प्रजापतिः ३९ अमृत्युः सर्वदृक्सिंहः संधा
ता संधिमान्स्थिरः अजो दुर्मर्षणः शास्ता विश्रुतात्मा
सुरारिहा ४० गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ४१ अ
ग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः सहस्र
मूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ४२ आवर्तनो
निवृत्तात्मा संवृतः संप्रमर्दनः अहः संवर्तको वह्नि
रनिलो धरणीधरः ४३ सुप्रसादः प्रसन्नात्मा विश्वधृ
ग्विश्वभुग्विभुः सत्कर्ता सत्कृतः साधुर्जह्नुर्ना
रायणो नरः ४४ असंख्येयोऽप्रमेयात्मा विशिष्टः शि
[illegible]

[illegible]ध्यक्षः [illegible] कृताकृतः चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्च
तुर्भुजः भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादि
जः अनघो विजयो जेता विश्वयोनिः पुनर्वसुः २४
उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः अतीन्द्रः सं
ग्रहः सर्गो धृतात्मा नियमो यमः २५ वेद्यो वैद्यः सदायो
गी वीरहा माधवो मधुः अतीन्द्रियो महामायो महोत्सा
हो महाबलः २६ महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्यु
तिः अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक्
२७ महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः अ
निरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः २८ मरीचि

[illegible] सिद्धसंकल्पः सिद्धिदः सिद्धिसाध
नः ७५ वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः वर्द्धनो
वर्द्धमानश्च विविक्तः श्रुतिसागरः ७६ सुभुजो दुर्द्धरो
वाग्मी महेन्द्रो वसुदो वसुः नैकरूपो बृहद्रूपः शिपिवि
ष्टः प्रकाशनः ७७ ओजस्तेजोद्युतिधरः प्रकाशात्मा
प्रतापनः ऋद्धः स्पष्टाक्षरो मंत्रश्चंद्रांशुर्भास्कर
द्युतिः ७८ अमृतांशूद्भवो भानुः शशबिंदुः सुरेश्व
रः औषधं जगतः सेतुः सत्यधर्मपराक्रमः ७९
भूतभव्यभवन्नाथः पवनः पावनोऽनलः कामहा काम
कृत्कान्तः कामः कामप्रदः प्रभुः ८० युगादिकृद्युगाव

क्रतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ॥ उग्रः संवत्स
रो दक्षो विश्रामो विश्वदक्षिणः ॥ ६३ ॥ विस्तारः स्थावर
स्थाणुः प्रमाणं बीजमव्ययम् । अर्थो नर्थो महाकोशो म
हाभोगो महाधनः ॥ ६४ ॥ अनिर्विण्णः स्थविष्ठो भूर्धर्मयू
पो महामखः । नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समी
हनः ॥ ६५ ॥ यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमं ॥ ६६ ॥
सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् । मनोह
रो जितक्रोधो वीरबाहुर्विदारणः ॥ ६७ ॥ स्वापनः स्वव
शो व्यापी नैकात्मा नैककर्मकृत् । वत्सरो वत्सलो व

७

७

तुलः शरभो भीमः समयज्ञो हविर्हरिः सर्वलक्षणलक्ष
ण्यो लक्ष्मीवान् समितिंजयः ५७ विक्षरो रोहितो मार्गो
हेतुर्दामोदरः सहः महीधरो महाभागो वेगवानमिताश
नः ५८ उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः कर
णं कारणं कर्ता विकर्ता गहनो गुहः ५९ व्यवसायो
व्यवस्थानः संस्थानः स्थानदो ध्रुवः परर्द्धिः परमस्प
ष्टस्तुष्टः पुष्टः शुभेक्षणः ६० रामो विरामो विरजो मा
र्गो नेयो नयो नयः वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मवि
दुत्तमः ६१ वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः
पृथुः हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ६२

हनः आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः
७४ महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः त्रिपद
स्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ७५ महावरा
हो गोविन्दः सुषेणः कनकाङ्गदी गुह्यो गभीरो गहनो
गुप्तश्चक्रगदाधरः ७६ वेधाः स्वाङ्गोऽजितः कृष्णो
दृढः संकर्षणोऽच्युतः वरुणो वारुणो वृक्षः
पुष्कराक्षो महास्वनः ७७ भगवान् भगहानन्दी
वनमाली हलायुधः आदित्यो ज्योतिरादित्यः सहि
ष्णुर्गतिसत्तमः ७८ सुधन्वा खण्डपरशुर्दारुणो
[illegible]
[illegible]

सो रत्नगर्भो धनेश्वरः ६८ धर्मगुब्धर्मकृद्धर्मी
सदसत्क्षरमक्षरम् अविज्ञाता सहस्रांशुर्विधाताकृत
लक्षणः ६९ गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्व
रः आदिदेवो महादेवो देवेशो देवभृद्गुरुः ७० उत्तरो गो
पतिर्गोप्ता ज्ञानगम्यः पुरातनः शरीरभूतभृद्भो
क्ता कपीन्द्रो भूरिदक्षिणः ७१ सोमपोऽमृतपः सोमः
पुरुजित्पुरुसत्तमः विनयो जयः सत्यसन्धो दाशार्हः
सात्वतांपतिः ७२ जीवो विनयिता साक्षी मुकुन्दोऽ
मितविक्रमः अम्भोनिधिरनन्तात्मा महोदधिशयोऽ
न्तकः ७३ अजो महार्हः स्वाभाव्यो जितामित्रः प्रमो

९

बैंतश्च चतुर्नोथः शास्ताः स्थिरः मूर्त्यामूर्त [illegible]
विशोकः शोकनाशनः ८५ अर्चिष्मानर्चितः कुंभो
विशुद्धात्मा विशोधनः अनिरुद्धोऽप्रतिरथः प्रद्युम्नो
ऽमितविक्रमः ८६ कालनेमिनिहा शौरिर्वीरः शू
रजनेश्वरः त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा
हरिः ८७ कामदेवः कामपालः कामी कान्तः कृतागमः
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनंजयः ८८ ब्रह्म
ण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्द्धनः ब्रह्मविद्ब्राह्म
णो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ८९ महाक्रमो मह
[illegible] महाक्रतुर्महायज्वा मह

९

रयोनिजः ७९ त्रिसामा सामगः सामनिर्वाणं भे
षजं भिषक् संन्यासकृच्छमः शान्तो निष्ठा शान्तिः
परायणम् ८० शुभांगः शांतिदः स्रष्टा कुमुदः कुवले
शयः गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ८१
अनिवर्त्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः श्रीव
त्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः ८२ श्रीदः श्री
शः श्रीनिवासः श्रीनिधिः श्रीविभावनः श्रीधरः श्री
करः श्रेयः श्रीमान्लोकत्रयाश्रयः ८३ स्वक्षः स्वं
गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः विजितात्मा वि
धेयात्मा सत्कीर्तिश्छिन्नसंशयः ८४ उदीर्णः स

[illegible] दुर्जयो दुरतिक्रमः दुर्लभो दुर्गमो
दुर्गो दुरा[illegible]रिहा १०१ शुभांगो लोकसारंगः सु
[illegible]तुवर्द्धनः इन्द्रकर्म्मा महाकर्म्मा कृतकर्म्मा कृ
तागमः १०२ उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलो
चनः अर्को वाजसनः शृंगी जयंतः सर्वविज्जयी १०३
सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः महाह्रदो
महागर्तो महाभूतो महानिधिः १०४ मुकुन्दः कुंद
रः कुन्दः पर्जन्यः पावनोऽनिलः अमृताशोऽमृतव
पुः सर्वज्ञः सर्वतोमुखः १०५ सुलभः सुव्रतः सि

क्षमिणांवरः

११५ अक्रूरः पेशलो दक्षो दक्षिणः

विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ११६

उत्तारणो दुःकृतिहा पुण्यो दुःस्वप्ननाशनः वीर

हा रक्षणः सन्तो जीवनः पर्यवस्थितः ११७

अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः चतु

रस्रो गभीरात्मा विदिशो व्यादिशो दिशः ११८ अना

दिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिरांगदः जननो ज

नजन्मादिर्भीमो भीमपराक्रमः ११९ आधार

निलयो धाता पुष्पहासः प्रजागरः ऊर्ध्वगः सत्पथा

चारः प्राणदः प्रणवः पणः १२० प्रमाणं प्राणनि

१२

49

यमः ११० सत्त्ववान्सात्त्विकः सत्यः सत्यधर्मपरा
यणः अभिप्रायः प्रियार्होऽर्हः प्रियकृत्प्रीतिवर्द्धनः
१११ विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः
रविर्विरोचनः सूर्यः सविता रविलोचनः ११२
अनन्तो हुतभुग्भोक्ता सुखदो नैकदोऽग्रजः
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः
११३ सनात्सनातनतमः कपिलः कपिरव्ययः
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षि
णः ११४ अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशा
सनः शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः

मेत सुकीर्तयेत् १३० यशः प्राप्नोति विपुलं ज्ञाति
प्राधान्यमेव च अचलां श्रियमाप्नोति श्रेयः प्रा
प्नोत्यनुत्तमम् १३१ न भयं क्वचिदाप्नोति वीर्यं
तेजश्च विन्दति भवत्यरोगो द्युतिमान् बलरूप
गुणान्वितः १३२ रोगार्तो मुच्यते रोगाद्बद्धो मु
च्येत बन्धनात् भयान्मुच्येत भीतस्तु मुच्येता
पन्न आपदः १३३ दुर्गाण्यतितरत्याशु पुरुषः पु
रुषोत्तमम् १३४ स्तुवन्नामसहस्रेण नित्यं भक्ति
समन्वितः वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः

[illegible] ससुरासुरगन्धर्वां सयक्षोरगराक्ष-
सं: १४० जगद्वशे वर्ततेदं कृष्णस्य सचराचरम्
इन्द्रियाणि मनो बुद्धिः सत्वं तेजो बलं धृतिः १४१
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञमेव च सर्वाग-
मानामाचारः प्रथमं परिकल्पते १४२ आचा-
रः प्रभवो धर्मो धर्मस्य प्रभुरच्युतः ऋषयः
पितरो देवा महाभूतानि धातवः १४३ जंगमा-
जंगमं चेदं जगन्नारायणोद्भवम् योगो ज्ञा-
नं [illegible] विद्याः शिल्पादि [illegible] १४४ [illegible]

पं॰ २ ... द्वे ने केशवश्चो केशवस्तु न एव न संशयः १४९

नि॰ ... नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षि

शिरोरुबाहवे सहस्रनाम्ने पुरुषाय शाश्वते सह

स्रकोटियुगधारिणे नमः १५० नमः कमलनाभा

य नमस्ते जलशायिने नमस्ते केशवानन्त वासुदे

व नमोस्तु ते १५१ वासनाद्वासुदेवस्य वासितं भु

वनत्रयम् सर्वभूतनिवासोसि वासुदेव नमोस्तु

ते १५२ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च

जगद्धिताय कृष्णाय गोविंदाय नमो नमः १५३

आकाशात्पतितं तोयं यथा गच्छति सागरं सर्व

पं० स्व ... हे मे केशवस्त्रीकेशवस्तु नर एव बलसंप्राप्तः १४९
न... मोस्त्वनंताय सहस्रमूर्तये सहस्रपादाक्षि
शिरोरुबाहवे सहस्रनाम्ने पुरुषाय शाश्वते सह
स्रकोटीयुगधारिणे नमः १५० नमः कमलनाभा
य नमस्ते जलशायिने नमस्ते केशवानंत वासुदे
व नमोस्तु ते १५१ वासनाद्वासुदेवस्य वासितं ते
जगत्त्रयम् सर्वभूतनिवासोसि वासुदेव नमोस्तु
ते १५२ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च
जगद्धिताय कृष्णाय गोविंदाय नमो नमः १५३
[illegible]

ह लोके परे वापि जन्मगुंवि पलैककिचित् नाम्नां
स्म. संपा ऽ योनिच्चादर्यामममसन्निचो १५९ सनि
हतिपापानि कल्पकोटिशतानि च अश्वमेधसनि
त्वेपार्थ शतानि मनसि चैवम् १६० पठेन्नामसहस्रं
तु गवांकोटिफलंभवेत् भिक्षालये पठेन्नित्यं तुलसीव
नसंस्थितः १६१ नरोमुक्तिमवाप्नोति च कपालो
र्वचेमणा ब्रह्महत्यादिकं पापं सर्वपापैः प्रमुच्यते १६२